प्र. 1 एकपदेन उत्तरत।

| | | |
|---|---|---|
| 1 | पिता पुत्राय बाल्ये किं यच्छति? | विद्याधनम् |
| 2 | विमूढधीः कीदृशीं वाचं परित्यजति? | धर्मप्रदाम् |
| 3 | अस्मिन् लोके के एव चक्षुष्मन्तः प्रकीर्तिताः? | विद्वांसः |
| 4 | प्राणेभ्योऽपि कः रक्षणीयः? | सदाचारः |
| 5 | आत्मनः श्रेयः इच्छन् नरः कीदृशं कर्म न कुर्यात्? | अहितं |
| 6 | वाचि किं भवेत्? | अवक्रता(सरलता) |

प्र.2 प्रश्ननिर्माणम्

| | | |
|---|---|---|
| 1 | **विमूढधीः** पक्वं फलं परित्यज्य अपक्वं फलं भुङ्क्ते। | कः |
| 2 | संसारे **विद्वांसः** ज्ञानचक्षुभिः नेत्रवन्तः कथ्यन्ते। | के |
| 3 | जनकेन **सुताय** शैशवे विद्याधनं दीयते। | कस्मै |
| 4 | **तत्त्वार्थस्य** निर्णयः विवेकेन कर्तुं शक्यः। | कस्य |
| 5 | धैर्यवान् **लोके** परिभवं न प्राप्नोति। | कुत्र/कस्मिन् |
| 6 | आत्मकल्याणाम् इच्छन् नरः **परेषाम्** अनिष्टं न कुर्यात्। | केषाम् |

प्र. 3 अन्वयम् उचितपदक्रमेण पूरयत।

| **शक्यः, प्रभूतानि, तत्कृतज्ञता, पुत्राय, कुर्यात्, केनापि, समत्वम्, ईरितः, कर्म** |
|---|

क) पिता __________ बाल्ये महत् विद्याधनं यच्छति, अस्य पिता किं तपः तेपे इत्युक्तिः __________।

ख) येन __________ यत् प्रोक्तं तस्य तत्त्वार्थनिर्णयः येन कर्तुं __________भवेत्, सः __________ इति __________

ग) यः आत्मनः श्रेयः __________ सुखानि च इच्छति, (सः) परेभ्यः अहितं __________ कदापि न __________।

प्र. 4 उत्तराणि लिखत।

| | | |
|---|---|---|
| 3क) | सत्या मधुरा च वाणी का? | धर्मप्रदा |
| ख) | धर्मप्रदां वाचं कः त्यजति? | विमूढधीः |
| ग) | मूढः पुरुषः कां वाणीं वदति? | परुषाम् |
| घ) | मन्दमतिः कीदृशं फलं खादति? | अपक्वम् |
| 7क) | बुद्धिमान् नरः किम् इच्छति? | आत्मनः श्रेयः |
| ख) | कियन्ति सुखानि इच्छति? | प्रभूतानि (कियान् कियती कियत्) |
| ग) | सः कदापि किं न कुर्यात्? | अहितम् |
| घ) | सः केभ्यः अहितं न कुर्यात्? | परेभ्यः |

प्र.6अ विलोमशब्दानां चयनं कुर्वन्तु

| | | |
|---|---|---|
| क) | पक्वः | ( परिपक्वः / **अपक्वः** / क्वथितः ) |
| ख) | विमूढधीः | ( **सुधीः** / निधिः / मन्दधीः ) |
| ग) | कातरः | ( अकरुणः / अधीरः / **अकातरः** ) |
| घ) | कृतज्ञता | ( कृपणता / **कृतघ्नता** / कातरता ) |
| ङ) | आलस्यम् | ( उद्विग्नता / विलासिता / **उद्योगः** ) |
| च) | परुषा | ( पौरुषी / **कोमला** / कठोरा ) |

प्र. 6आ) त्रयः समानार्थकाः शब्दाः मञ्जूषातः चित्वा लिखत।

**लोचनम् शुभम् मनः आननम् संसद् वदनम् नेत्रम् परिषद् समितिः चेतः**
**बहु शिवम् भूरि मानसम् नयनम् विपुलम् वक्त्रम् कल्याणम्**

| | | | | |
|---|---|---|---|---|
| क) | **प्रभूतम्** | भूरि | बहु | विपुलम् |
| ख) | **श्रेयः** | कल्याणम् | शुभम् | शिवम् |
| ग) | **चित्तम्** | मनः | मानसम् | चेतः |
| घ) | **चक्षुस्** | लोचनम् | नेत्रम् | नयनम् |

| | | | | |
|---|---|---|---|---|
| ङ) | मुखम् | आननम् | वक्त्रम् | वदनम् |
| च) | सभा | संसद् | परिषद् | समितिः |

प्र.7 **समस्तपदानि लिखत।**

| | | | |
|---|---|---|---|
| क) | **तत्वार्थस्य निर्णयः** | तत्वार्थनिर्णयः | षष्ठी तत्पुरुषः |
| ख) | ** **वाचि पटुः** | वाक्पटुः | षष्ठी तत्पुरुषः |
| ग) | **धर्मं प्रददाति इति (ताम्)** | धर्मप्रदाम् | उपपदतत्पुरुषः |
| घ) | **न कातरः** | अकातरः | नञ् तत्पुरुषः |
| ङ) | **न हितम्** | अहितम् | नञ् तत्पुरुषः |
| च) | **महान् आत्मा येषाम्** | महात्मानः | बहुव्रीहिः |
| छ) | **विमूढा धीः यस्य सः** | विमूढधीः | बहुव्रीहिः |



पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्।
पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता ॥

## पदच्छेदः

पिता, यच्छति, पुत्राय, बाल्ये, विद्या,धनम्, महत्, पिता,

अस्य, किम्, तपः, तेपे, इति, उक्तिः, तत्, कृतज्ञता।

## अन्वयः

पिता पुत्राय बाल्ये महत् विद्याधनं यच्छति।

अस्य (पुत्रस्य) पिता किं तपः तेपे इत्युक्तिः तत्कृतज्ञता।

## भावार्थः

पितुः दायित्वम् अस्ति यत् सः बाल्यकाले बालानां कृते शिक्षायाः प्रबन्धनं कुर्यात्। बालानां श्रेष्ठ-व्यवहारं दृष्ट्वा इतरजनाः वदेयुः यत् 'एतादृश-सन्ततिं प्राप्तुम् अस्य पिता कीदृशं तपः आचरितवान्' इति। एतादृशः व्यवहारः एव बालानां स्व-पितरं प्रति कृतज्ञता अस्ति।

## आङ्ग्लार्थः

It is the duty of the father to educate the child during childhood . How does the child repay this debt? To there parents by good behaviour (of the child), others should exclaim that the parents have done great tapas to beget such a child.



पिता यच्छति पुत्राय बाल्ये विद्याधनं महत् ।
पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता ।।

## शब्दार्थाः

| | | |
|---|---|---|
| पिता | ('पितृ' ऋका.,पुं.,प्र.वि.,ए.व.) | = जनकः |
| पुत्राय | ('पुत्र' अका.,पुं.,चतु.वि.,ए.व.) | = सुताय |
| बाल्ये | ('बाल्य' अका.पुं.,सप्त.वि.,ए.व.) | = शैशवे |
| महत् | ('महत्' तका.,नपुं.,द्वि.वि.,ए.व.) | = अधिकम् / महत्त्वपूर्णम् |
| विद्याधनम् | ('विद्याधन' अका.,नपुं.,द्वि.वि.,ए.व.) | = विद्या-रूप-धनम् |
| यच्छति | (दाण् धातुः 'यच्छ्' आदेशः लट्.,प्र.पु.,ए.व.) | = ददाति |
| अस्य | ('इदम्' मका., सर्व.,पुं.,ष.वि.,ए.व.) | अर्थात् पुत्रस्य |
| तपः | ('तपस्' सका.,नपुं.,द्वि.वि.,ए.व.) | = तपस्याम् |
| तेपे | ('तप्' धातुः,लिट्.,प्र.पु.,ए.व.) | अर्थात् कृतवान् / आचरितवान् |
| इति | (अव्ययपदम्) | = अनेन प्रकारेण |
| उक्तिः | ('उक्ति' इका.,स्त्री.,प्र.वि.,ए.व.) | = कथनम् |
| तत्कृतज्ञता | | = तस्य (पुत्रस्य) कृतज्ञता |
| कृतज्ञता | ('कृतज्ञता' आका.,स्त्री.,प्र.वि.,ए.) | = प्रति-उपकारः |



पिता यच्छति पुत्राय बाल्ये विद्याधनं महत् ।
पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता ।।

## भाव-बोधनम्

### यच्छति अर्थात् ददाति ..............

- कः यच्छति ? ✓पिता यच्छति।
- पिता किं यच्छति? ✓ पिता विद्याधनं यच्छति।
- विद्याधनं कीदृशं धनम् अस्ति? ✓ विद्यमानेषु सर्वेषु धनेषु विद्याधनं श्रेष्ठम् अस्ति।
- पिता महत् विद्याधनं कदा यच्छति? ✓ पिता महत् विद्याधनं बाल्यकाले यच्छति।
- पिता महत् विद्याधनं कस्मै यच्छति? ✓ पिता महत् विद्याधनं पुत्राय पुत्र्यै च यच्छति।
- सन्ततयः कृतज्ञतां कथं प्रकटयन्ति?
  - ✓ "अस्य पिता कीदृशं तपः आचरितवान्" इति जनानां प्रशंसा-द्वारा कृतज्ञतां प्रकटयन्ति।
- जनाः किं वदन्ति?
  - ✓ जनाः सन्ततीनां सदाचारं दृष्ट्वा वदन्ति यत् एतादृश्याः सन्ततेः प्राप्त्यर्थं तेषां पिता किं तपः आचरितवान् इति ।



# अवक्रता यथा चित्ते तथा वाचि भवेद् यदि।
# तदेवाहुः महात्मानः समत्वमिति तथ्यतः॥



## पदच्छेदः

अवक्रता, यथा, चित्ते, तथा, वाचि, भवेत्, यदि, तत्, एव, आहुः, महात्मानः, समत्वम्, इति, तथ्यतः।

## अन्वयः

यथा चित्ते अवक्रता (भवति) तथा यदि वाचि (अपि अवक्रता) भवेत्,तथ्यतः तत् एव समत्वम् इति महात्मानः आहुः।

## भावः

श्रेष्ठजनानां दृष्ट्या 'समत्वं किम् अस्ति ?'इति अस्मिन् श्लोके पठामः। मनुष्यः यथा मनसा निष्पक्षतया चिन्तयति, तथा एव यदि वाण्या अपि व्यवहारं करोति तर्हि तादृशं 'समानम् आचरणम्' एव समत्वम् अस्ति।

## आङ्ग्लार्थः

**If the mind is not crooked, then the words uttered is also not crooked. Unbiased in thought and words is called equanimity by great people.**



अवक्रता यथा चित्ते तथा वाचि भवेद् यदि।
तदेवाहुः महात्मानः समत्वमिति तथ्यतः ॥



# शब्दार्थाः

| | | |
|---|---|---|
| यथा | (अव्ययम्) | = यादृशी |
| अवक्रता | ('अवक्रता' आका.,स्त्री.,प्र.वि.,ए.व.) | = सरलता |
| चित्ते | ('चित्त' अका.,नपुं.,सप्त.वि.,ए.व.) | = मनसि |
| तथा | (अव्ययम्) | = तादृशी / तद्वत् |
| यदि | (अव्ययम्) | = चेत् |
| वाचि | ('वाच्' चका.,स्त्री.,सप्त.वि.,ए.व.) | = वाण्याम् |
| भवेत् | ('भू' धातुः, विधि.,प्र.पु.,ए.व.) | = जायेत |
| महात्मानः | ('महात्मन्' नका.,पुं.,प्र.वि.,बहु.व.) | = महापुरुषाः |
| तथ्यतः | (अव्ययम्) | = वस्तुतः |
| तदेव | (तत् + एव) (अव्ययम्) अर्थात् | मनसः वाण्याः च ऐक्यम् |
| समत्वम् | (अव्ययम्) | = समता |
| इति | (अव्ययम्) | = इत्थम् / अनेन प्रकारेण |
| आहुः | ('ब्रू' धातुः, लट्.,प्र.पु.,बहु.व.) | = कथयन्ति |



अवक्रता यथा चित्ते तथा वाचि भवेद् यदि ।
तदेवाहुः महात्मानः समत्वमिति तथ्यतः ॥



**भाव-बोधनम्**

## अवक्रता अर्थात् सरलता...........

- किं भवेत्?
  - अवक्रता (सरलता ) भवेत् ।
- सरलता कुत्र भवेत् ?
  - सरलता वाचि अर्थात् वाण्यां भवेत्।
- वाण्यां सरलता कदा भवति?
  - यदा चित्ते सरलता भवति, तर्हि वाचि अर्थात् वाण्यां सरलता भवति ।
- यदि चित्ते वाचि च समानता भवति तर्हि इदं किं कथ्यते ?
  - यदि चित्ते वाचि च समानता भवति तर्हि इदं "समत्वम्" इति कथ्यते।
- "तथ्यतः" इति पदस्य कः अर्थः भवति ?
  - "तथ्यतः" इति पदस्य अर्थः वास्तविकम् इति भवति।
- महात्मनां दृष्ट्या वास्तविकं समत्वं किम् अस्ति ?
  - महात्मनां दृष्ट्या निष्पक्षभावेन मनसि वाचि समानता एव वास्तविकं समत्वम् अस्ति ।



त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।
परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः॥



## पदच्छेदः

त्यक्त्वा, धर्म-प्रदाम्, वाचम्, परुषाम्, यः, अभ्युदीरयेत्,
परित्यज्य, फलम्, पक्वम्, भुङ्क्ते, अपक्वम्, विमूढधीः।

## अन्वयः

यः (मनुष्यः) धर्मप्रदां वाचं त्यक्त्वा परुषाम् (वाचम्) अभ्युदीरयेत्
(सः) विमूढधीः पक्वं फलं परित्यज्य अपक्वं फलं भुङ्क्ते ।

## भावः

यः मनुष्यः धर्मयुक्तां मधुरां वाणीं परित्यज्य अधर्मयुक्त-कठोरवाण्या वदति सः तादृशः मूर्खः भवति यथा कश्चित् पक्वं मधुरं फलं त्यक्त्वा अपक्वं फलं खादति। अतः सर्वदा मधुरं प्रियं च वदनीयम्।

## आङ्ग्लार्थः

Ignoring, sweet & sane words, uttering harsh words is like eating unripe fruits when ripe fruits are available.



त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।
परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः॥



## शब्दार्थाः

| | | |
|---|---|---|
| • यः | ('यद्' दका., सर्व., पुं.,प्र.वि.,ए.व.) | अर्थात् यः जनः । |
| • धर्मप्रदाम् | ('धर्मप्रदा' आका.,स्त्री.,द्वि.वि.,ए.व.) | = धर्मप्रदायिनीम् । |
| • वाचम् | ('वाच्' चका.,स्त्री.,द्वि.वि.,ए.व.) | = वाणीम् । |
| • त्यक्त्वा | ('त्यज्' धातुः, 'क्त्वा' प्रत्य.अव्ययम्) | = परित्यज्य । |
| • परुषाम् | ('परुषा' आका.,स्त्री.,द्वि.वि.,ए.व.) | = कठोर-वाणीम् । |
| • अभ्युदीरयेत् | ('अभि+उत्' उप., 'ईर्' धातुः,विधि.,प्र.पु.,ए.व.) | = वदेत् । |
| • विमूढधीः | ('विमूढधी' ईका.,पुं.,प्र.वि.,ए.व.) | = मूर्ख-मतिः । |
| • पक्वम् | ('पक्व' अका.,नपुं.,द्वि.वि.,ए.व.) | = रसपूर्णम् । |
| • फलम् | ('फल' अका.,नपुं.,द्वि.वि.,ए.व.) | = फलितम् । |
| • परित्यज्य | ('परि' उप., 'त्यज्' धातुः, ल्यप्.प्र. अव्ययम्) | = त्यक्त्वा । |
| • अपक्वम् | ('अपक्व' अका.,नपुं.,द्वि.वि.,ए.व.) | = न पक्वम् । |
| • भुङ्क्ते | ('भुज्' धातुः, आत्मने.,लट्.,प्र.पु.,ए.व.) | = खादति । |



त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।
परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः॥



## भाव-बोधनम्

अभ्युदीरयेत् अर्थात् वदेत् / वदति.....
भुङ्क्ते अर्थात् खादति............

- मनुष्यः कीदृशीं वाणीं वदेत्?
  ✓ मनुष्यः धर्मप्रदां मधुरां च वाणीं वदेत्।
- मनुष्यः कीदृशीं वाणीं त्यक्त्वा कठोरां वाणीं वदति ?
  ✓ मनुष्यः धर्मप्रदां मधुरां च वाणीं त्यक्त्वा कठोरां वाणीं वदति।
- मधुरां वाणीं त्यक्त्वा कठोरां वाणीं यः वदति सः कीदृशः मनुष्यः भवति?

✓ सः मूर्खः भवति । यथा कश्चन पक्वं फलं त्यक्त्वा अपक्वं फलं खादति

अतः सर्वदा धर्मप्रदां मधुरां च वाणीम् एव सर्वे वदेयुः।

- बुद्धिमति मूर्खे च कः भेदः भवति?

| बुद्धिमान् | मूर्खः |
|---|---|
| धर्मप्रदां मधुरां वाणीं वदति | मधुरां त्यक्त्वा परुषां /कठोरां वाणीं वदति |
| पक्वं फलं खादति | पक्वं त्यक्त्वा अपक्वं फलं खादति |



विद्वांस एव लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिताः।
अन्येषां वदने ये तु ते चक्षुर्नामिनी मते ॥



## पदच्छेदः

विद्वांसः, एव, लोके, अस्मिन्, चक्षुष्मन्तः, प्रकीर्तिताः,
अन्येषाम्, वदने, ये, तु, ते, चक्षुर्नामिनी, मते।

## अन्वयः

अस्मिन् संसारे विद्वांसः एव चक्षुष्मन्तः प्रकीर्तिताः,
अन्येषां वदने ये तु ते चक्षुर्नामिनी मते ।

## भावः

अस्मिन् संसारे ज्ञानार्जने येषां रुचिः वर्तते, ते एव नेत्रवन्तः सन्ति। यतः ज्ञानरूपिनेत्रम् एव मनुष्यस्य वास्तविकं नेत्रम् अस्ति। यस्य ज्ञानार्जने रुचिः न अस्ति तस्य नेत्रे तु केवलं नाम्ना एव ।

## आङ्ग्लार्थः

Only those who are educated have two eyes in their face, for other uneducated, it is just a name sake. (It is just a bruise)



विद्वांस एव लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिताः।
अन्येषां वदने ये तु ते चक्षुर्नामनी मते ॥



## शब्दार्थाः

| | | | |
|---|---|---|---|
| • अस्मिन् | ('इदम्' मका.,पुं.,सप्त.वि.,ए.व.) | - | एतस्मिन् |
| • संसारे | ('संसार' अका.,पुं.,सप्त.वि.,ए.व.) | - | लोके |
| • विद्वांसः | ('विद्वस्' सका.,पुं.,प्र.वि.,बहु.व.) | - | विद्यावन्तः |
| • एव | (अव्ययम्) | - | निश्चितम् |
| • चक्षुष्मन्तः | ('चक्षुष्मत्' तका.,पुं.,प्र.वि.,बहु.व.) | - | नेत्रवन्तः |
| • प्रकीर्तिताः | ('प्रकीर्तित' अका.,पुं.,प्र.वि.,बहु.व.) | - | प्रसिद्धाः / प्रशंसिताः |
| • अन्येषाम् | ('अन्य' अका., सर्व.पुं.,ष.वि.,बहु.व.) | - | इतरेषाम् |
| • वदने | ('वदन' अका.,नपुं.,सप्त.वि.,ए.व.) | - | मुखे |
| • तु | (अव्ययम्) | - | तर्हि |
| • ते | ('तद्' दका., नपुं., सर्व., प्र.वि.,द्वि.व.) | अर्थात् | नेत्रे |
| • चक्षुर्नामनी | ('चक्षुर्नामन्' नका.,नपुं.,प्र.वि.,द्वि.व.) | - | नाममात्रस्य कृते नयने |
| • मते | ('मत' अका.,नपुं.,प्र.वि.,द्वि.व.) | - | मानिते (स्तः) |



विद्वांस एव लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिताः।
अन्येषां वदने ये तु ते चक्षुर्नामिनी मते ॥



भाव-बोधनम्

प्रकीर्तिताः ............ अर्थात् कथिताः भवन्ति ।

- अस्मिन् संसारे वस्तुतः के चक्षुष्मन्तः सन्ति?
  - ✓ अस्मिन् संसारे वस्तुतः ये विद्याभ्यासं प्राप्तवन्तः ते एव चक्षुष्मन्तः सन्ति ।
- विद्वांसः एव चक्षुष्मन्तः किमर्थं भवन्ति ?
  - ✓ विद्वांसः एव नेत्रमाध्यमेन ज्ञानार्जनं कुर्वन्ति इति कारणेन ते एव चक्षुष्मन्तः भवन्ति।
- केषां नेत्रे नाममात्रस्य कृते भवतः?
  - ✓ विद्यया हीनानां जनानां नेत्रे केवलं नाममात्रस्य कृते भवतः।



यत् प्रोक्तं येन केनापि तस्य तत्त्वार्थनिर्णयः।
कर्तुं शक्यो भवेद्येन स विवेक इतीरितः॥५॥



## पदच्छेदः

यत्, प्रोक्तम्, येन, केन, अपि, तस्य, तत्त्व-अर्थ-निर्णयः,
कर्तुम्, शक्यः,भवेत्, येन, सः, विवेकः, इति, ईरितः।

## अन्वयः

येन केन अपि यत् प्रोक्तं तस्य तत्त्वार्थनिर्णयः,
येन कर्तुं शक्यः भवेत्, सः विवेकः इति ईरितः।

## भावः

'विवेकः' इति अनेन कः अभिप्रायः? अस्मिन् सन्दर्भे कथ्यते यः अपि उक्तानां विभिन्न-कथनानाम् अर्थं विश्लेषणं वा यस्याः शक्त्याः साहाय्येन सम्यक् रूपेण स्पष्टीकर्तुं समर्थः भवति ,सा  एव शक्तिः 'विवेकः' इति कथ्यते।

## आङ्ग्लार्थः

The mark of wisdom is to discern the correct meaning of the spoken words irrespective of who utters.



# यत् प्रोक्तं येन केनापि तस्य तत्त्वार्थनिर्णयः।
# कर्तुं शक्यो भवेद्येन स विवेक इतीरितः॥



## शब्दार्थाः

| | | | |
|---|---|---|---|
| येन | ('यद्' दका.,सर्व.,पुं.,तृ.वि.,ए.व.) | अर्थात् | येन अपि मानवेन |
| केन | ('किम्' मका.,सर्व.,पुं.,तृ.वि.,ए.व.) | अर्थात् | केन अपि मानवेन |
| यत् | ('यद्' दका.,सर्व.,नपुं.,प्र.वि.,ए.व.) | अर्थात् | वचनम्/ वाक्यम् |
| प्रोक्तम् | ('प्र' उप.,'वच्' धातु, 'क्त' प्र.,नपुं.,प्र.वि.,ए.व.) | - | कथितम् |
| तस्य | ('तद्' दका.,नपुं.,सर्व.,षष्ठी.वि.,ए.व.) | अर्थात् | वचनस्य /वाक्यस्य |
| तत्त्वार्थनिर्णयः | ('तत्त्वार्थनिर्णय' अका.,पुं.,प्र.वि.,ए.व.) | - | वास्तविकः अर्थः |
| येन | ('यद्' दका.,सर्व., पुं.,तृ.वि.,ए.व.) | - | येन माध्यमेन |
| कर्तुम् | ('कृ' धातुः,'तुमुन्' प्र.अव्य.) | - | करणार्थम् |
| शक्यः | ('शक्य' अका.,पुं.,प्र.पु.,ए.व.) | - | समर्थः /शक्यते वा |
| भवेत् | ('भू' धातुः, विधिलि.,प्र.पु.,ए.व.) | - | जायेत |
| सः | ('तद्' दका.,पुं.,सर्व.,प्र.वि.,ए.व.) | अर्थात् | बुद्धिविशेषः |
| विवेकः | ('विवेक' अका.,पुं,प्र.वि.,ए.व.) | - | सद्-असद् -विवेचिनी बुद्धिः(विवेकः) |
| ईरितः | ('ईर् णिच्' धातुः, 'क्त' प्र, पुं.,प्र.वि.,ए.व.) | - | कथितः |



यत् प्रोक्तं येन केनापि तस्य तत्त्वार्थनिर्णयः।
कर्तुं शक्यो भवेद्येन स विवेक इतीरितः॥



## भाव-बोधनम्

ईरितः ...अर्थात्....... कथितः।

- कः कथितः?
  - ✓ विवेकः कथितः।
- कः विवेकः कथ्यते?
  - ✓ यः तत्त्वार्थनिर्णयं कर्तुं शक्यः सः विवेकः कथ्यते ।
- ‘तत्त्वार्थनिर्णयः’ इति पदस्य कः अर्थः भवति?
  - ✓ ‘तत्त्वार्थनिर्णयः’ इति पदस्य अर्थः वास्तविक-अर्थस्य निर्णयः’ इति अस्ति।
- तत्त्वार्थनिर्णयः कुत्र कर्तव्यः?
  - ✓ येन केनापि यत्किमपि प्रोक्तम्, तेषु वचनेषु तत्त्वार्थनिर्णयः कर्तव्यः ।



## वाक्पटुर्धैर्यवान् मन्त्री सभायामप्यकातरः।
## स केनापि प्रकारेण परैर्न परिभूयते॥६॥

### पदच्छेदः

वाक्पटुः, धैर्यवान्, मन्त्री, सभायाम्, अपि, अकातरः, सः,

केनापि, प्रकारेण, परैः, न, परिभूयते ।

### अन्वयः

(यः) मन्त्री वाक्पटुः, धैर्यवान्, सभायाम् अपि अकातरः (अस्ति)
सः परैः केन अपि प्रकारेण न परिभूयते ।

### भावार्थः

यः विषयस्य मन्थनं करोति, भाषाप्रयोगे दक्षः भवति, सर्वदा धैर्यं धारयति सभायां कदापि हतोत्साहः न भवति सः देशहितार्थं सदैव निर्भयरूपेण निर्णयान् स्वीकरोति अन्येषां जनानां प्रभावे अथवा अन्येषां जनानां द्वारा पराजितः न भवति।

### आङ्ग्लार्थः

A minister who is a gifted speaker, courageous, untiring in his work, shall not be conquered in any way by others.



# वाक्पटुर्धैर्यवान् मन्त्री सभायामप्यकातरः।
# स केनापि प्रकारेण परैर्न परिभूयते॥

## शब्दार्थाः

| | | | |
|---|---|---|---|
| मन्त्री | ('मन्त्रिन्' नका.,पुं.,प्र.वि.,ए.व.) | = | प्रमुखपरामर्शकः/मनस्वी |
| वाक्पटुः | ('वाक्पटु' उका.,पुं.,प्र.वि.,ए.व.) | = | सम्भाषणकुशलः |
| धैर्यवान् | ('धैर्यवत्' तका.,पुं., प्र.वि.,ए.व.) | = | धैर्यशीलः |
| सभायाम् | ('सभा' आका.,स्त्री.,सप्त.वि.,ए.व.) | = | परिषदि |
| अपि | (अव्ययम्) | = | पुनः च |
| अकातरः | ('अकातर' अका.,पुं.,प्र.वि.,ए.व.) | = | उत्साही |
| सः | ('तद्' दका.,सर्व.,पुं.,प्र.वि.,ए.व.) | अर्थात् | मानवः |
| परैः | ('पर' अका.,पुं.,तृ.वि.,बहु.व.) | = | अन्यजनैः |
| केन | ('किम्' मका.,पुं.,तृ.वि.,ए.व.) | अर्थात् | मानवेन |
| प्रकारेण | ('प्रकार' अका.पुं.,तृ.वि.,ए.व.) | = | माध्यमेन |
| न | (अव्ययम्) | = | नैव |
| परिभूयते | ('परि' उप., 'भू' धातुः., कर्मणि लट्.ल.,प्र.पु.,ए.व.) | = | पराजितः/ अपमानितः |

भाव-बोधनम्

# वाक्पटुर्धैर्यवान् मन्त्री सभायामप्यकातरः।
# स केनापि प्रकारेण परैर्न परिभूयते॥

परिभूयते...........अर्थात् ...अपमानितः क्रियते ।

- कः न परिभूयते ?
- मन्त्री न परिभूयते ।
- कीदृशः मन्त्री न परिभूयते ?
- वाक्पटुः मन्त्री न परिभूयते ।
- कीदृशः वाक्पटुः मन्त्री न परिभूयते ?
- धैर्यवान् वाक्पटुः मन्त्री न परिभूयते ।
- कीदृशः धैर्यवान् वाक्पटुः मन्त्री न परिभूयते ?
- अकातरः, धैर्यवान् वाक्पटुः च मन्त्री न परिभूयते ।
- अकातरः, धैर्यवान् वाक्पटुः च मन्त्री कुत्र न परिभूयते ?
- अकातरः, धैर्यवान् वाक्पटुः च मन्त्री सभायां न परिभूयते ।
- अकातरः, धैर्यवान् वाक्पटुः च मन्त्री सभायां कथं न परिभूयते ?
- अकातरः, धैर्यवान् वाक्पटुः च मन्त्री सभायां केन अपि प्रकारेण न परिभूयते।
- अकातरः,धैर्यवान् वाक्पटुः च मन्त्री सभायां कैः केन अपि प्रकारेण न परिभूयते?
- अकातरः, धैर्यवान् वाक्पटुः च मन्त्री सभायाम् अन्यजनैः केन अपि प्रकारेण न परिभूयते।





य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च।
न कुर्यादहितं कर्म स परेभ्यः कदापि च ॥७॥

**पदच्छेदः**

यः, इच्छति, आत्मनः, श्रेयः, प्रभूतानि, सुखानि, च,
न, कुर्यात्, अहितम्, कर्म, सः, परेभ्यः, कदा, अपि, च।

**अन्वयः**

यः आत्मनः श्रेयः प्रभूतानि च सुखानि इच्छति,
सः परेभ्यः अहितं कर्म कदापि न कुर्यात्॥

**भावार्थः**

यः मानवः स्वकीयं कल्याणम् अधिकं च सुखम् इच्छति, सः कदापि अन्येषां जनानां कृते अकल्याणकरं कर्म न कुर्यात् अपितु सर्वदा कल्याणकरं कर्म कुर्यात् ।

**आङ्ग्लार्थः**

Sorrow is only to those who cause pain to others. So if one wants prosperity, limitless happiness for oneself then he or she shall desist from causing harm to others.



य इच्छत्यात्मन: श्रेय: प्रभूतानि सुखानि च।
न कुर्यादहितं कर्म स परेभ्य: कदापि च ॥

## शब्दार्थाः

| | | | |
|---|---|---|---|
| यः | ('यद्' दका.,पुं.,प्र.वि.,ए.व.) | अर्थात् | यः मानवः |
| आत्मन: | ('आत्मन्' नका.,पुं.,षष्ठी.वि.,ए.व.) | = | स्वस्य |
| श्रेय: | ('श्रेयस्' सका.,नपुं.,द्वि.वि.,ए.व.) | = | कल्याणम् |
| प्रभूतानि | ('प्रभूत' अका.,नपुं.,द्वि.वि.,बहु.व.) | = | अत्यधिकानि |
| सुखानि | ('सुख' अका.,नपुं.,द्वि.वि.,बहु.व.) | = | ऐश्वर्य-धन-धान्यादीनि |
| इच्छति | ('इष्' धातुः,लट्.,प्र.पु.,ए.व.) | = | वाञ्छति |
| सः | ('तद्' दका.,पुं.,प्र.वि.,ए.व.) | अर्थात् | सः मानवः |
| परेभ्य: | ('पर' अका.,पुं.,पञ्च.वि.,बहु.) | = | अन्यजनेभ्यः |
| अहितम् | ('अहित' अका.,नपुं.,द्वि.वि.,ए.व.) | = | न हितम् / अकल्याणकरम् |
| कर्म | ('कर्मन्' नका.,नपुं.,द्वि.वि.,ए.व.) | = | कार्यम् |
| कदापि | (कदा + अपि) | = | कस्मिन् अपि काले |
| न | (अव्ययम्) | = | मा / नैव |
| कुर्यात् | ('कृ' धातुः,विधिलि.,प्र.पु.,ए.व.) | = | सम्पादयेत् |



य इच्छत्यात्मन: श्रेय: प्रभूतानि सुखानि च।
न कुर्यादहितं कर्म स परेभ्य: कदापि च ॥

## भाव-बोधनम्

इच्छति .....अर्थात्...इच्छां करोति।

- कः इच्छति ?
- मनुष्यः किम् इच्छति?
- मनुष्यः कस्य कल्याणं सुखानि च इच्छति?
- मनुष्यः कति सुखानि इच्छति?
- यः मनुष्यः स्वकल्याणं सुखानि च इच्छति सः किं न कुर्यात्।
- सः केभ्यः अहितकरं कर्म न कुर्यात् ?
- सः परेभ्यः अहितकरं कर्म कदा न कुर्यात् ?

✓ मनुष्यः इच्छति।
✓ मनुष्यः कल्याणं सुखानि च इच्छति।
✓ मनुष्यः आत्मनः कल्याणं सुखानि च इच्छति।
✓ मनुष्यः प्रभूतानि सुखानि इच्छति।
✓ यः मनुष्यः स्वकल्याणं सुखानि च इच्छति सः अहितकरं कर्म न कुर्यात्।
✓ सः परेभ्यः अहितकरं कर्म न कुर्यात् ।
✓ सः परेभ्यः अहितकरं कर्म कदापि न कुर्यात्।



आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।
तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः॥८॥



## पदच्छेदः

आचारः, प्रथमः, धर्मः, इति, एतत्, विदुषाम्, वचः,
तस्मात्, रक्षेत्, सदाचारम्, प्राणेभ्यः, अपि, विशेषतः।

## अन्वयः

आचारः प्रथमः धर्मः इति एतत् विदुषां वचः,
तस्माद् (मनुष्यः) प्राणेभ्यः अपि सदाचारं विशेषतः रक्षेत्।

## भावः

आचारः (सद्-व्यवहारः) मनुष्यस्य प्रमुखः धर्मः अस्ति। एषः श्रेष्ठजनानां जीवनसन्देशः अस्ति।
अतः सदाचारस्य रक्षणं प्राणेभ्यः अपि अधिकतया करणीयम्।

## आङ्ग्लार्थः

**Propriety of conduct leads to eminence;
hence it is preserved even at the cost of one's life.**



आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।
तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः॥



# शब्दार्थाः

| | | |
|---|---|---|
| आचारः | ('आचार' अका.,पुं.,प्र.वि.,ए.व.) | - सद्-व्यवहारः |
| प्रथमः | ('प्रथम' अका.,पुं.,प्र.वि.,ए.व.) | - प्रमुखः |
| धर्मः | ('धर्म' अका.,पुं.,प्र.वि.,ए.व.) | - कर्त्तव्यम् |
| विदुषाम् | ('विद्वस्' सका.,पुं.,ष.वि.,बहु.व.) | - विद्वज्जनानाम् |
| वचः | ('वचस्' सका.,नपुं.,प्र.वि.,ए.व.) | - वचनम् |
| तस्माद् | ('तद्' दका.,नपुं.,पञ्च.वि.,ए.व.) | - अतः |
| प्राणेभ्यः | ('प्राण' अका.,पुं.,पञ्च.वि.,बहु.व.) | अर्थात् प्राणान् त्यक्त्वा अपि |
| सदाचारम् | ('सदाचार' अका.,पुं.,द्वि.वि.,ए.व.) | - सदाचरणम् |
| विशेषतः | ('विशेष' अका.,पु.,'तसिल्' प्रत्य.) | - विशेषरूपेण |
| रक्षेत् | ('रक्ष्' धातुः, विधि.लिङ्.ल.,प्र.पु.,ए.व.) | - रक्षणं कुर्यात् / रक्षणीयम् |



आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।
तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः॥



## भाव-बोधनम्

- ➢ विदुषां वचः किम् अस्ति?
- ✓ "आचारः प्रथमः धर्मः" इति विदुषां वचः अस्ति।

- ➢ मनुष्यस्य प्रथमः धर्मः कः अस्ति?
- ✓ मनुष्यस्य प्रथमः धर्मः सदाचारः अस्ति।

- ➢ मनुष्यः केषां रक्षणं सर्वस्मात् अधिकं करोति?
- ✓ मनुष्यः प्राणानां रक्षणं सर्वस्मात् अधिकं करोति।

- ➢ मनुष्यः प्राणेभ्यः अपि अधिकं कस्य रक्षां विशेषतः कुर्यात्?
- ✓ मनुष्यः प्राणेभ्यः अपि अधिकं सदाचारस्य रक्षां विशेषतः कुर्यात्।

- ➢ अस्माभिः प्राणेभ्यः अपि अधिकं सदाचारस्य रक्षा किमर्थं कर्तव्या ?
- ✓ अस्माभिः प्राणेभ्यः अपि अधिकं सदाचारस्य रक्षा कर्तव्या 'यतः सदाचारः एव अस्माकं प्रथमः धर्मः अस्ति।

| पदानि | विपर्ययपदानि |
|---|---|
| हानिः | लाभः |
| सहयोगेन | असहयोगेन |

अभ्यासः

एन०सी०ई०आर०टी०प्रश्नाः

1. अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखत

(क) वनराजः कैः दुरवस्थां प्राप्तः?

(ख) कः वातावरणं कर्कशध्वनिना आकुलीकरोति?

(ग) काकचेष्टः विद्यार्थी कीदृशः छात्रः मन्यते?

(घ) कः आत्मानं बलशाली, विशालकायः, पराक्रमी च कथयति।

(ङ) बकः कीदृशान् मीनान् क्रूरतया भक्षयति?

(च) मयूरः कथं नृत्यमुद्रायां स्थितः भवति?

(छ) अन्ते सर्वे मिलित्वा कस्य राज्याभिषेकाय तत्पराः भवन्ति?

(ज) अस्मिन्नाटके कति पात्राणि सन्ति?

उत्तराणि

(क) तुच्छजीवैः

(ख) काकः

(ग) आदर्श

(घ) गजः

(ङ) वराकान्

(च) पिच्छानुद्घाट्य

(छ) उलूकस्य

(ज) द्वादश

2. अधोलिखितप्रश्नानामुत्तराणि पूर्णवाक्येन लिखत

(क) निःसंशयं कः कृतान्तः मन्यते?

(ख) बकः वन्यजन्तूनां रक्षोपायान् कथं चिन्तयितुं कथयति?

(ग) अन्ते प्रकृतिमाता प्रविश्य सर्वप्रथमं किं वदति?

(घ) यदि राजा सम्यक् न भवति तदा प्रजा कथं विप्लवेत् ?

उत्तराणि

(क) निःसंशयं सः एव कृतान्तः मन्यते यः पार्थिवरूपेण सदा परैः वित्रस्तान् पीड्यमानान् जीवान् न रक्षति।

(ख) बकः वन्यजन्तूनां रक्षोपायान् शीतले जले बहुकालपर्यन्तं ध्यानमग्नः स्थितप्रज्ञः इव स्थित्वा चिन्तयितुं कथयति।

(ग) अन्ते प्रकृतिमाता प्रविश्य सर्वप्रथमं वदति-भोः भोः प्राणिनः । यूयं सर्वे एव मे सन्ततिः। कथं मिथः कलहं कुर्वन्ति। वस्तुतः सर्वे वन्यजीविनः अन्योन्याश्रिताः।

(घ) यदि राजा सम्यक् न भवति तदा प्रजा अकर्णधारा जलधौ नौः इव इह विप्लवेत् ।

3. रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत

(क) सिंहः वानराभ्यां <u>स्वरक्षायाम्</u> असमर्थः एवासीत् ?

(ख) गजः वन्यपशून् तुदन्तं <u>शुण्डेन</u> पोथयित्वा मारयति?

(ग) वानरः आत्मानं <u>वनराजपदाय</u> योग्यः मन्यते?

(घ) मयूरस्य नृत्यं <u>प्रकृतेः</u> आराधना?

(ङ) सर्वे <u>प्रकृतिमातरं</u> प्रणमन्ति?

उत्तराणि

(क) सिंहः वानराभ्यां कस्याम् असमर्थः एवासीत् ?

(ख) गजः वन्यपशून् तुदन्तं केन पोथयित्वा मारयति?

(ग) वानरः आत्मानं कस्मै किमर्थम् योग्यः मन्यते?

(घ) मयूरस्य नृत्यं कस्याः आराधना? ।

(ङ) सर्वे काम प्रणमन्ति?

4. शुद्धकथनानां समक्षम् आम् अशुद्धकथानानां च समक्षं न इति लिखत

(क) सिंहः आत्मानं तुदन्तं वानरं मारयति।

(ख) का-का इति बकस्य ध्वनिः भवति।

(ग) काकपिकयोः वर्णः कृष्णः भवति।

(घ) गजः लघुकायः निर्बलः च भवति।

(ङ) मयूरः बकस्य कारणात् पक्षिकुलम् अवमानितं मन्यते।

(च) अन्योन्यसहयोगेन प्राणिनां लाभः जायते।

उत्तराणि (क) न (ख) न (ग) आम् (घ) न (ङ) आम् (च) आम

5. मञ्जूषातः समुचितं पदं चित्वा रिक्तस्थानानि पूरयत

स्थितप्रज्ञः, यथासमयम्, मेध्यामध्यभक्षकः, अहिभुक्, आत्मश्लाघाहीनः, पिकः

(क) काकः ................. भवति।

(ख) ............. परभृत् अपि कथ्यते।

(ग) बकः अविचलः ................ इव तिष्ठति।

(घ) मयूरः ...... इति नाम्नाऽपि ज्ञायते।

(ङ) उलूकः .................. पदनिर्लिप्तः चासीत् ।

(च) सर्वेषामेव महत्त्वं विद्यते

उत्तराणि

(क) मेध्यामध्यभक्षकः

(ख) पिकः

(ग) स्थितप्रज्ञः

(घ) अहिभुक्

(ङ) आत्मश्लाघाहीनः

(च) यथासमयम्

6. परिचयं पठित्वा पात्रस्य नाम लिखत

(क) अहं शुण्डेन कमपि पोथयित्वा मारयितुं समर्थः।

(ख) मम सत्यप्रियता सर्वेषां कृते उदाहरणस्वरूपा।

(ग) मम पिच्छानामपूर्वं सौन्दर्यम्।

(घ) अहं पराक्रमिणं भयंकरं वापि जन्तुं पराजेतुं समर्थः।

(ङ) अहं वनराजः। कथं सर्वे मिलित्वा मां तुदन्ति?

(च) अहम् अगाधजलसञ्चारी अपि गर्वं न करोमि?

(छ) अहं सर्वेषां प्राणिनां जननी अस्मि।

(ज) एषः तु करालवक्त्रः दिवान्धः चास्ति।

उत्तराणि

(क) गजः

(ख) काकः

(ग) मयूरः

(घ) वानरः

(ङ) सिंहः

(च) रोहितः मत्स्यः

(छ) प्रकृतिमाता

(ज) उलूकः

7. वाच्यपरिवर्तनं कृत्वा लिखत

उदाहरणम्- क्रुद्धः सिंहः इतस्ततः धावति गर्जति च।

- क्रुद्धेन सिंहेन इतस्ततः धाव्यते गर्यते च।

(क) त्वया सत्यं कथितम्

(ख) सिंहः सर्वजन्तून् पृच्छति।

(ग) काकः पिकस्य सन्ततिं पालयति।

(घ) मयूरः विधात्रा एव पक्षिराजः वनराजः वा कृतः।

(ङ) सर्वैः खगैः कोऽपि खगः एव वनराजः कर्तुमिष्यते स्म।

(च) सर्वे मिलित्वा प्रकृतिसौन्दर्याय प्रयत्नं कुर्वन्तु।

उत्तराणि

(क) त्वं सत्यं कथितवान् ।

(ख) सिंहेन सर्वजन्तवः पृच्छ्यन्ते।

(ग) काकेन पिकस्य सन्ततिः पाल्यते।

(घ) मयूरं विधाता एव पक्षिराज वनराजं वा कृतवान्।

(ङ) सर्वे खगाः कमपि कमपि खगम् एव वनराजं कर्तुम् इच्छन्ति स्म।

(च) सर्वैः मिलित्वा प्रकृतिसौन्दर्याय प्रयत्नः क्रियताम्।

8. समासविग्रहं समस्तपदं वा लिखत

(क) तुच्छजीवैः

(ख) वृक्षोपरि

(ग) पक्षिणां सम्राट

(घ) स्थिता प्रज्ञा यस्य सः -

(ङ) अपर्वम

(च) व्याघचित्रको

उत्तराणि

(क) तुच्छैः जीवैः तुच्छः जीवः, तैः

(ख) वृक्षस्य उपरि

(ग) पक्षिसम्राट

(घ) स्थितप्रज्ञः

(ङ) न पूर्वम्

(च) व्याघ्रः च चित्रकः च

9. प्रकृतिप्रत्ययविभागं कुरुत/योजयित्वा वा पदं रचयत

(क) क्रुध् + क्त

(ख) आकृष्य

(ग) सत्यप्रियता -

(घ) पराक्रमी

(ङ) कूर्द + क्त्वा -

(च) शृण्वन्

उत्तराणि

(क) क्रुद्धः

(ख) आ + कृष् + ल्यप्

(ग) सत्यप्रिय + तल्

(घ) पराक्रम + इन् (णिनि)

(ङ) कूर्दित्वा

(च) श्रु + शतृ

अतिरिक्ताः प्रश्नाः

I. अधोलिखितगद्यांशान्, नाट्यांशान्, पद्यांशान् च पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत

1. (वनस्य दृश्यम्। समीपे एवैका नदी अपि वहति ।) एकः सिंहः सुखेन विश्राम्यते तदैव एकः वानरः आगत्य तस्य पुच्छं धुनोति। क्रुद्धः सिंहः तं प्रहर्तुमिच्छति परं वानरस्तु कूर्दित्वा वृक्षमारूढः। तदैव अन्यस्मात् वृक्षात् अपरः वानरः सिंहस्य कर्णमाकृष्य पुनः वृक्षोपरि आरोहति एवमेव वानराः वारं वारं सिंहं तुदन्ति। क्रुद्धः सिंहः इतस्ततः धावति, गर्जति परं किमपि कर्तुमसमर्थः एव तिष्ठति। वानराः हसन्ति वृक्षोपरि च विविधाः पक्षिणः अपि सिंहस्य एतादृशीं दशां दृष्ट्वा हर्षमिश्रितं कलरवं कुर्वन्ति। निद्राभङ्गदुःखेन वनराजः सन्नपि तुच्छजीवैः आत्मनः एतादृश्या दुरवस्थया श्रान्तः सर्वजन्तून् दृष्ट्वा पृच्छति-

I. एकपदेन उत्तरत

(i) कस्य समीपे एका नदी वहति?

(ii) कः सिहस्य पुच्छं धुनोति?

II. पूर्णवाक्येन उत्तरत

(i) क्रुद्धः सिंहः किं करोति?

(ii) पक्षिणः अपि सिंहस्य क्शां दृष्ट्वा किं कुर्वन्ति?

III. भाषिककार्यम्

(i) 'तुदन्ति' इति क्रियापदस्य कर्तृपदं किम्?

(ii) 'पक्षिणः' इति कर्तृपदस्य क्रियापदं किम्?

(iii) 'क्रुद्धः सिंहः' अनयोः पदयोः विशेष्यपदं किम् ?

(iv) 'तस्य पुच्छं धुनोति' अत्र 'तस्य' पदं कस्मै प्रयुक्तम् ?

# अशुद्धिशोधनम्

| | |
|---|---|
| १) विवेकः दुग्धं पिबन्ति। | पिबति |
| २) सा सुन्दरा नारी अस्ति। | सुन्दरी |
| ३) हे बालक ! पीतः वस्त्रम् आनय। | पीतम् |
| ४) उद्याने पुष्पाः सन्ति। | पुष्पाणि |
| ५) त्रयः नार्यः उद्याने भ्रमन्ति। | तिस्रः |
| ६) गुरुं नमः। | गुरवे |
| ७) अहं श्वः श्रीनगरम् अगच्छम्। | गमिष्यामि |
| ८) मेघेन गर्जनेन मयूराः नृत्यन्ति। | मेघस्य |

१) अस्मिन् चित्रं विद्यालयस्य अस्ति।

एतत्　इयम्　एतस्मिन्

**एतत्**

२) तत्र अनेकाः बालकाः क्रीडन्ति।

अनेकः　अनेके　अनेकानि

**अनेके**

३) सर्वाः वृक्षाः हरिताः सन्ति।

सर्व　सर्वाणि　सर्वे

**सर्वे**

४) अहं मित्रं पुस्तकं दास्यामि।

मित्रस्य　मित्रे　मित्राय

**मित्राय**

५) कवी मञ्चे अस्ति।

आसीत्　सन्ति　स्तः

**स्तः**

# अशुद्धिशोधनम्

अभ्यासः

| | | |
|---|---|---|
| १) | किं त्वं कार्यं न अकरोत् ? | अकरोः |
| २) | खगाः तु सदैव उच्चैः उड्डयति । | उड्डयन्ति |
| ३) | मम मित्रं योग्यः अस्ति। | योग्यम् |
| ४) | ह्यः मम गृहे केचन अतिथयः आगमिष्यन्ति। | आगच्छन् |
| ५) | त्वं प्रतिदिनं पठति। | पठसि |
| ६) | पाण्डवाः पञ्च आसीत्। | आसन् |
| ७) | तस्य वस्त्राणि सुन्दराः सन्ति। | सुन्दराणि |
| ८) | भवतः किं अभिधानम् ? | शुद्धं वाक्यम् |
| ९) | मम भगिनी श्वः नागपुरनगरम् अगच्छत् । | ह्यः |
| १०) | किं त्वया पुस्तकं पठितानि? | पठितम् |

काव्यं पठितम् । काव्ये पठिते । काव्यानि पठितानि।

कविता पठिता । कविते पठिते । कविताः पठिताः ।

पाठः पठितः । पाठौ पठितौ । पाठाः पठिताः ।

| | | |
|---|---|---|
| ११) | भवान् अत्र किं करोषि? | करोति |
| १२) | मह्यं श्वेतम् अम्बराणि रोचन्ते। | |
| १३) | त्वया सह के गच्छति? | |
| १४) | अहं श्वः अगच्छम्। | |
| १५) | द्वौ अश्वौ चलन्ति। | |

# अशुद्धिशोधनम्

१६) सीता महान् स्त्री अस्ति।

१७) सा पितुः सह गमिष्यति।

१८) परमः क्रीडायै प्रवीणः अस्ति।

१९) इदं मम कार्यालयः ।

२०) अयं बालिका सम्यक् अभिनयं करोति।

## प्रदत्तविकल्पेभ्यः उचितम् अव्ययपदं चित्वा रिक्तस्थानानि पूरयत ।

**1**

| विना | इतस्ततः | पुरा | एव | अधुना |
|---|---|---|---|---|

1. . . . . . . . . . . . . . . . . . अहं संस्कृतस्य परीक्षां ददामि ।
2. विद्यां . . . . . . . . . . . . . . . . . जीवनं नरकम् भवति ।
3. शिशुः . . . . . . . . . . . . . . . . . भ्रमति ।
4. . . . . . . . . . . . . . . . . . . राजा दशरथः आसीत् ।
5. सत्यम् . . . . . . . . . . . . . . . . . एव जयते ।

**2**

| उच्चैः | इव | शनैः–शनैः | यथा | विना | इतस्ततः | एव |
|---|---|---|---|---|---|---|

1. . . . . . . . . . . . . . . . . . अभ्यासं कृत्वा छात्रः विद्यापारङ्गतः अभवत् ।
2. ये . . . . . . . . . . . . . . . . . गर्जन्ति ते न वर्षन्ति ।
3. . . . . . . . . . . . . . . . . . आचार्यः कथयति तथैव कुरु ।
4. नर्तकी तु मयूरः . . . . . . . . . . . . . . . . . नृत्यति ।
5. रात्रौ वीथिकासु . . . . . . . . . . . . . . . . . भ्रमणं न उचितम् ।

**3**

| सहसा | इतस्ततः | एव | इव | शनैः |
|---|---|---|---|---|

1. . . . . . . . . . . . . . . . . . विदधीत न क्रियाम् ।
2. विद्या . . . . . . . . . . . . . . . . . राजसु पूज्यते ।
3. पश्य, उपवने वृद्धाः तु . . . . . . . . . . . . . . . . . चलन्ति ।
4. वने पशवः . . . . . . . . . . . . . . . . . भ्रमन्ति ।

**4**

| इव | अधुना | पुरा | विना | इतस्ततः | एव |
|---|---|---|---|---|---|

1. . . . . . . . . . . . . . . . . . अहं संस्कृतस्य परीक्षां ददामि ।
2. विद्यां. . . . . . . . . . . . . . . . . . जीवनं नरकम् ।
3. शिशुः . . . . . . . . . . . . . . . . . भ्रमति ।
4. . . . . . . . . . . . . . . . . . अशोकः नाम राजा आसीत् ।
5. "सत्यम् . . . . . . . . . . . . . . . . . जयते" इति उपनिषदः वाक्यम् ।

www.bhavinpathak.webs.com

**5 कोष्ठकात् उचितैः अव्ययपदैः रिक्तस्थानानि पूरयत ।**

1. अहम् . . . . . . . . . . . . . . . . . दूरदर्शने नाटकं पश्यामि । (यथा/अधुना/पुरा/इव)
2. मेघाः . . . . . . . . . . . . . . . . . . गर्जन्ति । (इतस्ततः/उच्चैः/इव/विना)
3. वयम् पुष्पाणि . . . . . . . . . . . . . . . . . . सदा प्रसन्नाः भवेम । (एव/इव/अपि/विना)
4. . . . . . . . . . . . . . . . . . . कालिदासः महाकविः आसीत् । (अधुना/एव/सहसा/पुरा)
5. कमलं . . . . . . . . . . . . . . . . . दूरदर्शने नाटकं पश्यामि । (यथा/अधुना/पुरा/इव)
6. . . . . . . . . . . . . . . . रात्रिः सञ्जाता, गृहात् भहिः मा गच्छ ।(इतस्ततः/उच्चैः/अधुना/विना)
7. मनमोहनः . . . . . . . . . . . . वदति, नरेन्द्रः . . . . . . . . . . . . . वदति ।(उच्चैः/इव/अपि/शनैः)
8. कच्छपः आकाशात् . . . . . . . . . . . . . . . . . भूमौ पतति । (अधुना/एव/सहसा/पुरा)
9. कमलं . . . . . . . . . . . . . . . . . न शोभते सरः । (विना/अपि/अत्र/एव)
10. मत्स्याः जलं . . . . . . . . . . . . . . . . . . जीवितुं न शक्नोति । (विना/अपि/उच्चै/इतस्ततः)
11. . . . . . . . . . . . कालिदासेन मेघदूतं लिखितम् । (सहसा/पुरा/इदानीम्/अधुना)
12. पुष्पैः सह कण्टकानि . . . . . . . . . . . भवन्ति । (विना/अपि/पुरा/इदानीम्)
13. उद्याने युवकाः . . . . . . . . . . . न चलन्ति । (इव/अपि/पुरा/शनैः)
14. कक्षायां . . . . . . . . . . . मा वद । (इव/उच्चैः/पुरा/शनैः)
15. . . . . . . . . . . . राजा तथा प्रजा । (यदा/यावत्/यत्र/यथा)
16. आमलकवृक्षः तु अमृतवृक्षः . . . . . . . . . . . (इव/यावत्/तथा/पुरा)
17. . . . . . . . . . . . सिद्ध्यतु स्वकथनम् । (एव/इदानीम्/अपि/एव)
18. सः मुखेन चन्द्रः . . . . . . . . . . . प्रतीयते । (एव/विना/अपि/एव)
19. समुद्रेषु वृष्टिः . . . . . . . . . . . भवति । (एव/इदानीम्/अपि/वृथा)
20. विद्याधनं केन . . . . . . . . . . . चोरयितुं न शक्यते । (एव/इदानीम्/अपि/वृथा)
21. . . . . . . . . . . . सत्सङ्गतिः करणीया । (नूनम्/पुरा/अपि/वृथा)
22. यूयम् . . . . . . . . . . . मा भ्रमत । (एव/इदानीम्/अपि/वृथा)
23. सिंहस्य गर्जनं श्रुत्वा मृगाः . . . . . . . . . . . अधावन् । (एव/उच्चैः/यत्र/इतस्ततः)
24. यूयम् . . . . . . . . . . . मा भ्रमत । (एव/इदानीम्/अपि/वृथा)
25. अस्माभिः . . . . . . . . . . . वृक्षाः रक्षणीयाः । (उच्चैः/नूनम्/यथा/वृथा)

www.bhavinpathak.webs.com

# <u>अव्यया:</u>

१. सबसे पहले वाक्य के अर्थ को ग्रहण करें ।

२. कोष्ठक में यदि अधोलिखित शब्द हो तो उनका प्रयोग पहले करें जैसे

- ✓ 'बहि:' के साथ पञ्चमी विभक्ति
- ✓ 'ह्य:' – वाक्य भूतकाल में होगा । (लङ् लकार:, क्तप्रत्यय तथा क्तवतु प्रत्यय)
- ✓ 'श्व:' – वाक्य भविष्यत्काल (लृट् लकार) में होगा ।
- ✓ इति' – "ऐसा, यह"सामान्यत: किसी के द्वारा बोले गये वाक्यों के बाद इति लगाया जाता है । जैसे caption, notation, quotation, extract etc.
- ✓ 'कदा', 'किमर्थम्' सामान्यत: प्रश्नवाचक वाक्य होता है ।

| क्रम | अव्यय | हिन्दी | English | उदाहरण तथा अर्थ |
|---|---|---|---|---|
| १ | इति | ऐसा, यह | That, like | त्वं कदा विद्यालयं गमिष्यति **इति** मां कथय ।<br>तुम कब विद्यालय जाओगे यह मुजे कहो । |
| २ | कदा | कब | When | ग्रीष्मावकाश: **कदा** भविष्यति ?<br>ग्रीष्मावकाश कब होगा ? |
| ३ | कुत: | कहां से कैसे | From where, how | अलसस्य **कुत:** विद्या ?<br>अलसी को कहाँ से विद्या प्राप्त हो ? |
| ४ | मा | न, नहि | Don't | कोलाहलं **मा** कुरु ।<br>कोलाहल मत करो । |
| ५ | यत् | कि | That | अहं न जानामि **यत्** स: कदा आगमिष्यति ?<br>मैं नहि जानता कि वह कब आएगा ? |
| ६ | यत्र-कुत्र | कहीं भी | Any where | वानर: यत्र-कुत्र अपि गत्वा कूर्दति ।<br>बंदर कहीं भी जा कर कुदता है । |
| ७ | सम्प्रति | अब, अभी | Now | **<u>सम्प्रति</u>** परीक्षा चलति ।<br>अभी परीक्षा चल रही है । |
| ८ | यदा-कदा | कभी कभी | Some times | अहं **यदा-कदा** देवालयं गच्छामि ।<br>मैं कभी कभी देवालय जाता हूँ । |
| ९ | यावत् | जब-तक, तक | Till, until | अहं सततं परिश्रमं करिष्यामि **यावत्** सफ़ल: न भविष्यामि । मैं सतत परिश्रम करुँगा जब तक मैं सफ़ल नहीं होता । |
| १० | श्व: | आने वाला कल | Tomorrow | **श्व**: वयं काश्मीरं गमिष्याम: ।<br>कल हम कश्मीर जाएगें । |
| ११ | ह्य: | बीता हुआ कल | Yesterday | **ह्य:** ते सर्वे चलत्चित्रं दृष्टवन्त: / अपश्यन् ।<br>कल उन्होंने सब ने चलचित्र देखा । |
| १२ | बहि: | बाहर | Outside | बाल: **गृहात्** **<u>बहि:</u>** क्रीडति ।<br>बच्चा घर केबहार खेलता है |
| १३ | कदापि | कभी भी | Any time | सज्जना: **कदापि** दुष्कृत्यं न कुर्वन्ति ।<br>सज्जन कभी भी खराब कार्य नहीं करते । |
| १४ | किमर्थम् | क्यों | Why | स: **किमर्थम्** शीघ्रम् चलति ।<br>वह क्यों जलदी चलता है ? |

www.mysanskrit.in

# पाठः ५ जननी तुल्यवत्सला

१ एकपदेन उत्तरत ।

| | | |
|---|---|---|
| क) | वृषभः दीनः इति जानन्नपि कः तं नुद्यमानः आसीत् ? | कृषकः/कृषीवलः |
| ख) | वृषभः कुत्र पपात ? | क्षेत्रे |
| ग) | दुर्बले सुते कस्याः अधिका कृपा भवति? | मातुः/जनन्याः |
| घ) | कयोः एकः शरीरेण दुर्बलः आसीत् ? | बलिवर्दयोः/वृषभयोः |
| ङ) | चण्डवातेन मेघरवैश्च सह कः समजायत ? | प्रवर्षः |

२ पूर्णवाक्येन उत्तरत ।

| | | |
|---|---|---|
| क) | कृषकः किं करोति स्म? | क)....क्षेत्रकर्षणं.... |
| ख) | माता सुरभिः किमर्थम् अश्रूणि मुञ्चति? | ख) भूमौ.......माता... |
| ग) | सुरभिः इन्द्रस्य प्रश्नस्य किमुत्तरं ददाति। | ग) सुरभिः....ददाति –“......”इति। |
| घ) | मातुः अधिका कृपा कस्मिन् भवति? | घ) दीने पुत्रे |
| ङ) | इन्द्रः दुर्बलवृषभस्य कष्टानि अपाकर्तुं किं कृतवान्? | ङ) प्रवर्षम् / अतिवृष्टिम् |
| च) | जननी कीदृशी भवति? | च) तुल्यवत्सला |
| छ) | पाठेऽस्मिन् कयोः संवादः विद्यते? | छ) इन्द्रस्य सुरभेः च /इन्द्रसुरभ्योः |

३ यथायोग्यं मेलयत ।

| | | | |
|---|---|---|---|
| क) | कृच्छ्रेण | वृषभः | काठिन्येन |
| ख) | चक्षुर्भ्याम् | वासवः | नेत्राभ्याम् |
| ग) | जवेन | नेत्राभ्याम् | द्रुतगत्या |
| घ) | इन्द्रः | अचिरम् | वासवः |
| ङ) | पुत्राः | द्रुतगत्या | सुताः |
| च) | शीघ्रम् | काठिन्येन | अचिरम् |
| छ) | बलीवर्दः | सुताः | वृषभः |

४ स्थूलपदमाधृत्य प्रश्ननिर्माणं कुरुत-

| | | |
|---|---|---|
| क) | सः <u>कृच्छ्रेण</u> भारम् उद्वहति। | कथम् |
| ख) | <u>सुराधिपः</u> ताम् अपृच्छत् । | कः |
| ग) | अयम् <u>अन्येभ्यो</u> दुर्बलः | केभ्यः |

# पाठः ५ जननी तुल्यवत्सला

| | | |
|---|---|---|
| घ) | <u>धेनूनां</u> माता सुरभिः आसीत् । | कासाम् |
| ङ) | <u>सहस्राधिकेषु</u> पुत्रेषु सत्स्वपि सा दु:खी आसीत्। | कति |

५ सन्धिं सन्धिच्छेदं वा कुरुत।

| | | |
|---|---|---|
| क) | कृषक: क्षेत्रकर्षणं कुर्वन्+आसीत्। | कुर्वन्नासीत् |
| ख) | तयोरेकः वृषभः दुर्बलः आसीत्। | तयोः + एकः |
| ग) | तथापि वृषः न+उत्थितः। | नोत्थितः |
| घ) | सत्स्वपि बहुषु पुत्रेषु अस्मिन् वात्सल्यं कथम् ? | सत्सु+अपि (स् उ+अ → स् व्+अ→स्व) |
| ङ) | तथा+अपि+अहम्+अस्मिन् स्नेहम् अनुभवामि। | तथाप्यहमेतस्मिन् |
| च) | मे बहूनि + अपत्यानि सन्ति। | बहून्यपत्यानि |
| छ) | सर्वत्र जलोपप्लवः सञ्जातः। | जल + उपप्लवः |

६ रेखाङ्कितपदं कस्मै प्रयुक्तम् ?

| | | |
|---|---|---|
| क) | सा च अवदत् भो वासव! अहं भृशं दु:खिता अस्मि। | सुरभ्यै/सुरभये |
| ख) | पुत्रस्य दैन्यं दृष्ट्वा अहम् रोदिमि। | सुरभ्यै/सुरभये |
| ग) | सः दीनः इति जानन् अपि क्रुषकः तं पीडयति। | वृषाय/बलिवर्दाय/वृषभाय |
| घ) | मे बहूनि अपत्यानि सन्ति। | सुरभ्यै/सुरभये |
| ङ) | सः च ताम् एवम् असात्वयत् । | इन्द्राय/आखण्डलाय/कौशिकाय/देवराजाय/<br>सुराधिपाय/शक्राय/त्रिदशाधिपाय/वासवाय |
| च) | सहस्रेषु पुत्रेषु सस्वपि तव अमिन् प्रीतिः अस्ति। | सुरभ्यै/सुरभये |

३ यथायोग्यं मेलयत ।

| | | | |
|---|---|---|---|
| क) | कश्चित् | वृषभम् | क) कश्चित् कृषकः |
| ख) | दुर्बलम् | कृपा | ख) दुर्बलम् वृषभम् |
| ग) | क्रुद्धः | कृषीवलः | ग) क्रुद्धः कृषीवलः |
| घ) | सहस्राधिकेषु | आखण्डलः | घ) सहस्राधिकेषु पुत्रेषु |
| ङ) | अभ्यधिका | जननी | ङ) अभ्यधिका कृपा |
| च) | विस्मितः | पुत्रेषु | च) विस्मितः आखण्डलः |
| छ) | तुल्यवत्सला | कृषकः | छ) तुल्यवत्सला जननी |

# तत्पुरुष-समासभेदाः

| विभक्ति तत्पुरुष (विभक्ति) | नञ् तत्पुरुषः (विरोधार्थक) | कर्मधारय | द्विगु (संख्या+वस्तु+समाहारः) | उपपदतत्पुरुषः (कर्ता+क्रिया) |
|---|---|---|---|---|
| जीवनरक्षा<br>जीवनस्य रक्षा | स्वरः → अन्<br>अनुदारः - न उदारः<br>व्यंजन → अ<br>असत्यम् - न सत्यम् | (विशेषण+विशेष्य)<br>उत्तमजनाः -<br>उत्तमाः जनाः<br>(उपमान+उपमेय)<br>विद्याधनम् –<br>विद्या एव धनम् | चतुर्युगम् –<br>चतुर्णां युगानां समाहारः | पङ्कजः –<br>पङ्के जायते इति<br>दिनकरः<br>दिनं करोति इति |

## विभक्ति-तत्पुरुष-समासः

- इस समास में उत्तरपद से प्रश्न पूछने परे पूर्वपद की विभक्ति का ज्ञान होता है।
- विग्रह करते समय जिस विभक्ति का प्रयोग होता है उस विभक्ति से यह समास जाना जाता है यथा क्रीडाक्षेत्रम् – क्रीडायाः क्षेत्रम् (षष्ठी तत्पुरुष समास)

**उदाहरणम्**

| | | |
|---|---|---|
| • अश्वपतितः | अश्वात् पतितः | ५ |
| • कर्मकुशलः | कर्मणि कुशलः ~~(कर्मे कुशलः)~~ कर्मन् – मूलशब्दः | ७ |
| • कार्यनिपुणः | कार्ये निपुणः / कार्येषु निपुणः | ७ |
| • कालिदासरचितम् | कालिदासेन रचितम् | ३ |
| • कुलगुरुः | | |
| • ग्रामगतः | | |
| • चौरभयम् | | |
| • जनहितम् | | |
| • जलमग्नः | | |
| • धनहीनः | | |
| • नरपतिः | | |
| • न्यायपण्डितः | | |
| • पाठशाला | | |

| | | |
|---|---|---|
| • पितृसमः | | |
| • बालार्थः (कविता) | | |
| • भिक्षाटनम् | | |
| • मानवनिर्मितम् | | |
| • युद्धनिपुणः | | |
| • राजपुरुषः | | |
| • रामवचनम् | | |
| • राष्ट्रपतिः | | |
| • रोगमुक्तः | | |
| • विद्यालय: | | |
| • विद्याविहीनः | | |
| • वृक्षारूढः | | |
| • शरणागतः | | |
| • सङ्कटमुक्तः | | |
| • सुखयुक्तः | | |
| • सुरेशः | | |
| • हस्तताडितः | | |
| • हिमालयः | | |
| • महानगरमध्ये | | |
| • कालायसचक्रम् | | |
| • जनग्रसनम् | | |
| • वाष्पयानमाला | | |
| • यानपङ्क्तयः | | |
| • वायुमण्डलम् | | |
| • धरातलम् | | |

| | | |
|---|---|---|
| • ग्रामान्ते | | |
| • पयःपूरम् | | |
| • कुसुमावलिः | | |
| • समीरचालिता | | |
| • वनदेशम् | | |
| • पुत्रद्वयोपेता | | |
| • देहसुखम् | | |
| • यन्त्रनिर्मितम् | | |
| • धनप्राप्तः | | |

| | | |
|---|---|---|
| अश्वपतितः | अश्वात् पतितः | ५ |
| कर्मकुशलः | कर्मणि कुशलः | ७ |
| कार्यनिपुणः | कार्ये निपुणः | ७ |
| कालिदासरचितम् | कालिदासेन रचितम् | ३ |
| कुलगुरुः | कुलस्य गुरुः | ६ |
| ग्रामगतः | ग्रामं गतः | २ |
| चौरभयम् | चौरात् भयम् | ५ |
| जनहितम् | जनेभ्यः हितम् | ४ |
| जलमग्नः | जले मग्नः | ७ |
| धनहीनः | धनेन हीनः | ३ |
| नरपतिः | नराणां पतिः | ६ |
| न्यायपण्डितः | न्याये पण्डितः | ७ |
| पाठशाला | पाठाय शाला | ४ |
| पितृसमः | पित्रा समः | ३ |
| बालार्थः | बालाय अयम् | ४ |
| भिक्षाटनम् | भिक्षायै अटनम् | ४ |
| मानवनिर्मितम् | मानवेन निर्मितम् | ३ |
| युद्धनिपुणः | युद्धे निपुणः | ७ |
| राजपुरुषः | राज्ञः पुरुषः | ६ |
| रामवचनम् | रामस्य वचनम् | ६ |
| राष्ट्रपतिः | राष्ट्रस्य पतिः | ६ |
| रोगमुक्तः | रोगात् मुक्तः | ५ |
| विद्यालयः | विद्यायै आलयः | ४ |
| विद्याविहीनः | विद्यया विहीनः | ३ |
| वृक्षारूढः | वृक्षम् आरूढः | २ |
| शरणागतः | शरणम् आगतः | २ |
| सङ्कटमुक्तः | सङ्कटात् मुक्तः | ५ |
| सुखयुक्तः | सुखेन युक्तः | २ |
| सुरेशः | सुराणाम् ईशः | ६ |
| हस्तताडितः | हस्तेन ताडितः | ३ |
| हिमालयः | हिमस्य आलयः | ६ |

# वाच्यपरिवर्तनम् Change of Voice

| | | | | |
|---|---|---|---|---|
| कर्तृवाच्यम् कर्तरि | He | is eating | Fruits. | active |
| | sub. | verb | obj. | |
| | | | | |
| कर्मवाच्यम् कर्मणि | Fruits | are being eaten | By him. | passive |
| | obj | verb | sub | |
| | | | 3rd | |

१. वाक्यनिर्माण की शैली को वाच्य कहते है । क्रिया का वह रूप जिससे यह बोध होता है कि क्रिया को मूल रूप से चलाने वाला कर्ता है , कर्म है या भाव है, उसे वाच्य कहते है । वाच्य में क्रिया को कहने की शैली बदल जाती है परन्तु क्रिया का अर्थ नहीं बदलता । जैसे

छात्रः पुस्तकं पठति । (छात्र पुस्तक पढता है) कर्तृवाच्यम्

छात्रेण पुस्तकं पठ्यते । (छात्र के द्वारा पुस्तक पढी जाती है) कर्मवाच्यम्

यहाँ दोनों वाक्य का अर्थ एक ही है परन्तु शैली अलग अलग है । कर्तृवाच्य में कर्ता को महत्त्व दिया जाता है और कर्मवाच्य में कर्म को महत्त्व दिया जाता है ।

१. कर्तृवाच्यम् — **Active Voice**

२. कर्मवाच्यम् — **With object** } **Passive Voice**

३. भाववाच्यम् — **Without object** } **Passive Voice**

२. कर्तृवाच्य में कर्ता प्रथमा विभक्ति में, कर्म द्वितीया विभक्ति में तथा क्रियापद कर्ता के अनुसार चलते है ।

३. कर्मवाच्य में कर्ता तृतीया विभक्ति में, कर्म प्रथमा विभक्ति में तथा क्रियापद कर्म के अनुसार चलते है ।

४. भाववाच्य में कर्ता तृतीया विभक्ति में चलता है । यहाँ कर्म न होने से क्रियापद प्रथमपुरुष एकवचन मे होगा ।

५. यदि कर्ता या कर्म के लिए कोई विशेषण या सर्वनाम का प्रयोग किया गया है तो उसमें भी यथा योग्य विभक्ति उपयोग कि जाएगी ।

६. क्रियापद बनाने के लिए

(मूल धातु) + (य) + आत्मने पद के प्रत्यय (ते)

| | | | |
|---|---|---|---|
| यथा | पठ् + य + ते | = | पठ्यते / पठ्यते |
| | कृ + य + ते | = | क्रियते |
| | दा + य + ते | = | दीयते |
| | गम् + य + ते | = | गम्यते |
| | वद् + य + ते | = | उद्यते |

# वाच्यपरिवर्तनम् Change of Voice

| उदाहरणम् | बालकाः | विद्यालये | पाठम् | पठन्ति । | (कर्तृवाच्यम्) |
|---|---|---|---|---|---|
| | (कर्ता) | (अधिकरण) | (कर्म) | (क्रियापद) | बच्चें विद्यालय में पाठ पढते है । |
| | प्रथमा | सप्तमी | द्वितीया | कर्ता-अनुसार | |
| | बहुवचनम् | एकवचनम् | एकवचनम् | बहुवचनम् | |
| | बालकैः | विद्यालये | पाठः | पठ्यते | (कर्मवाच्यम्) |
| | (कर्ता) | (अधिकरण) | (कर्म) | (क्रियापद) | बच्चों के द्वारा विद्यालय में पाठ पढा जाता है । |
| | तृतीया | सप्तमी | प्रथमा | कर्म-अनुसार | |
| | बहुवचनम् | एकवचनम् | एकवचनम् | एकवचनम | |

| | Active कर्तरि | Passive कर्मणि |
|---|---|---|
| Sub | 1 | 3 |
| Obj | 2 | 1 |

| Active to passive |
|---|
| S13 |
| O21 |

रूपरचना (३०)

| क्रमः | धातुः | लट् लकारः | कर्मवाच्य रूपम् | क्रमः | धातुः | लट् लकारः | कर्मवाच्य रूपम् |
|---|---|---|---|---|---|---|---|
| १. | क्री | क्रीणाति | क्रीयते | २. | प्रति+ईक्ष् | प्रतीक्षते | प्रतीक्ष्यते |
| ३. | क्रीड् | क्रीडति | क्रीड्यते | ४. | परि+ईक्ष् | परीक्षते | परीक्ष्यते |
| ५. | क्षाल् | क्षालयति | क्षाल्यते | ६. | पत् | पतति | पत्यते |
| ७. | ज्ञा | जानाति | ज्ञायते | ८. | पूज् | पूजयति | पूज्यते |
| ९. | आ+चर् | आचरति | आचर्यते | १०. | पूर् | पूरयति | पूर्यते |
| ११. | आ+नी | आनयति | आनीयते | १२. | पठ् | पठति | पठ्यते |
| १३. | गै | गायति | गीयते | १४. | कुप् | कुप्यति | कुप्यते |
| १५. | गर्ज् | गर्जति | गर्ज्यते | १६. | कथ् | कथयति | कथ्यते |
| १७. | ग्रह् | गृह्णाति | गृह्यते | १८. | कम्प् | कम्पते | कम्प्यते |
| १९. | गण् | गणयति | गण्यते | २०. | भक्ष् | भक्षयति | भक्ष्यते |
| २१. | गम्-गच्छ् | गच्छति | गम्यते | २२. | भ्रम् | भ्रमति | भ्रम्यते |
| २३. | अनु_भू | अनुभवति | अनुभूयते | २४. | भाष् | भाषते | भाष्यते |
| २५. | रुद् | रोदिति | रुद्यते | २६. | भी | बिभेति | भीयते |
| २७. | अस् | अस्ति | भूयते | २८. | भू | भवति | भूयते |
| २९. | चुर् | चोरयति | चोर्यते | ३०. | दा | ददाति | दीयते |
| ३१. | चल् | चलति | चल्यते | ३२. | लभ् | लभते | लभ्यते |
| ३३. | उत्+पत् | उत्पतति | उत्पत्यते | ३४. | दृश् | पश्यति | दृश्यते |

# वाच्यपरिवर्तनम् Change of Voice

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| ३५. | उत्+डी | उड्डयते | उड्डीयते | ३६. | रक्ष् | रक्षति | रक्ष्यते |
| ३७. | उप+दिश् | उपदिशति | उपदिश्यते | ३८. | रच् | रचयति | रच्यते |
| ३९. | उप+विश् | उपविशति | उपविश्यते | ४०. | वृध् | वर्धते | वृध्यते |
| ४१. | चिन्त् | चिन्तयति | चिन्त्यते | ४२. | वृष् | वर्षति | वर्ष्यते |
| ४३. | जि | जयति | जियते | ४४. | वन्द् | वन्दते | वन्द्यते |
| ४५. | मिल् | मिलति | मिल्यते | ४६. | वद् | वदति | उद्यते |
| ४७. | लिख् | लिखति | लिख्यते | ४८. | वस् | वसति | उष्यते |
| ४९. | वि+कस् | विकसति | विकस्यते | ५०. | हृ | हरति | ह्रियते |
| ५१. | धृ | धारयति | धार्यते | ५२. | हन् | हन्ति | हन्यते |
| ५३. | धाव् | धावति | धाव्यते | ५४. | हस् | हसति | हस्यते |
| ५५. | नृत् | नृत्यति | नृत्यते | ५६. | सेव् | सेवते | सेव्यते |
| ५७. | नी | नयति | नीयते | ५८. | सम्+मन् | सम्मानयति | सम्मान्यते |
| ५९. | नम् | नमति | नम्यते | ६०. | स्था | तिष्ठति | स्थीयते |
| ६१. | नश् | नाशयति | नाश्यते | ६२. | स्ना | स्नाति | स्नायते |
| ६३. | कृ | करोति | क्रियते | ६४. | स्मृ | स्मरति | स्मर्यते |
| ६५. | पच् | पच् | पच्यते | ६६. | स्वप् | स्वपिति | सुप्यते |
| ६७. | पा | पिबति | पीयते | ६८. | श्रु | शृणोति | श्रूयते |
| ६९. | प्र+नम् | पणमति | प्रणम्यते | ७०. | खेल् | खेलति | खेल्यते |
| ७१. | प्र+शंस् | प्रशसंति | प्रशंस्यते | ७२. | खाद् | खादति | खाद्यते |
| ७३. | प्रच्छ् | पृच्छति | पृच्छ्यते | ७४. | शीङ् | शेते | शीयते |

अभ्यासः १

नयना सुमेश ! त्वं अधुना किं करोषि ?

सुमेशः अधुना तु (१)____मया________ पुस्तकं पठ्यते ।

नयना शोभनम् ! अधुना त्वं पुस्तकं (२)____पठसि________ ।

सुमेशः (३)_____________ किं क्रियते ? त्वया

नयना मया अपि (४)_____________ पठ्यन्ते। पुस्तकानि

सुमेशः शोभनम् ! पुस्तकं पठ ।

नयना पुस्तकं पठित्वा मया (५)_____________ लिख्यते । (लेखम् /लेखः/लेखाः)

अभ्यासः २

रामः त्वं कुत्र गच्छसि?

श्यामः अहं तु आपणं (१)_____________ ।

रामः तत्र (२)_____________ किमर्थम् गम्यते ?

श्यामः (३)_____________ फलानि क्रेतुं गच्छामि ।

**रामः** **अहं तु (४)_____________ न क्रीणामि ।**

**श्यामः** **तर्हि** त्वया **किं (५)_____________ ।**

**अभ्यासः ३**

**राधिका** **नमिते ! अधुना त्वं किं (१)_____________ ?** करोषि / पठसि

**नमिता** **श्वः मम परीक्षा अस्ति तदर्थम् मया पाठः (२)_____________।** पठ्यते

**राधिका** उत्तमं यत् त्वं पाठं पठसि।

**नमिता** **अधुना** त्वया किं (३)__________________। क्रियते

**अभ्यासः ४**

**गुरुः** **लते! गत्वा पश्य किम् उद्याने (१)_____________ क्रीडन्ति ? (छात्र)**

**लता** **आम्, आचार्य ! उद्याने छात्रैः (२)_____________ ।**

**गुरुः** **किं कोऽपि चित्रमपि रचयति?**

**लता** **आम् आचार्य ! तत्र कैश्चित् चित्रमपि (३)_____________ ।**

**गुरुः** **शोभनम् । किं छात्राः तत्र (४)_____________ तु न त्रोटयन्ति ?**

**लता** **न, न श्रीमन् ! छात्रैः तत्र पुष्पाणि न (५)_____________ ।**

सः वृक्षात् पतति। तेन वृक्षात् पत्यते ।

बालेकेन प्रभाते अपि सुप्यते

बालियया रुद्यते

बालकः युवकः भवति। बालकेन युवकः भूयते।

सः उपविशति तेन उपविश्यते

सः कवितां पठति॥ तेन कविता पठ्यते ।

सः पठति। तेन पठ्यते।

## स्वाध्यायः

प्र.१ एकपदेन उत्तरं लिखत

क) कुशलवौ कम् उपसृत्य प्रणमतः ?
रामम्

ख) तपोवनवासिनः कुशस्य मातरं केन नाम्ना आह्वयन्ति ?
देवी देवीति (देवी इति)

ग) वयोऽनुरोधात् कः लालनीयः भवति ?
शिशुजनः

घ) केन सम्बेन वाल्मीकिः लवकुशयोः गुरुः ?
उपनयनोपदेशेन

ङ) कुत्र लवकुशयोः पितुः नाम न व्यवह्रियते ?
तपोवने

प्र.२ पूर्णवाक्येन उत्तरं लिखत।

क) रामाय कुशलवयोः कण्ठाश्लेषस्य स्पर्शः कीदृशः आसीत् ?
रामाय कुशलवयोः कण्ठाश्लेषस्य स्पर्शः हृदयग्राही आसीत्।

ख) रामः लवकुशौ कुत्र उपवेशयितुं कथयति ?
रामः लवकुशौ अङ्के उपवेशयितुं कथयति।
रामः लवकुशौ राजासने उपवेशयितुं कथयति।

ग) बालभावात् हिमकरः कुत्र विराजते ?
बालभावात् हिमकरः पशुपतिमस्तके विराजते।

घ) कुशलवयोः वंशस्य कर्ता कः?
कुशलवयोः वंशस्य कर्ता सहस्रदीधितिः(=सूर्यः) अस्ति।

ङ) कुशलवयोः मातरं वाल्मीकिः केन नाम्ना आह्वयति?
कुशलवयोः मातरं वाल्मीकिः वधूः नाम्ना आह्वयति।

प्र.३ रेखाङ्कितेषु पदेषु विभक्तिं तत्कारणं च उदाहरणानुसारं निर्दिशत –

| | | विभक्तिः | तत्कारणम् |
|---|---|---|---|
| यथा | राजन् अलम् **अतिदाक्षिण्येन** | तृतीया | अलम् योगे |
| क) | रामः लवकुशौ **आसनार्धम्** उपवेशयति। | द्वितीया | उप+विश्+प्रेरक |
| ख) | धिङ् **माम्** एवं भूतम्। | द्वितीया | धिक् |
| ग) | अङ्कव्यवहितम् अध्यास्यतां **सिंहासनम्**। | द्वितीया | अधि+आस् |
| घ) | अलम् **अतिविस्तरेण**। | तृतीया | अलम् |
| ङ) | **रामम्** उपसृत्य प्रणम्य च। | द्वितीया | गमनार्थे |

प्र.४ यथानिर्देशम् उत्तरत।

| | | |
|---|---|---|
| क) | "जानाम्यहम् तस्य नामधेयम्" अस्मिन् वाक्ये कर्तृपदं किम् ? | अहम् |
| ख) | "किं कुपिता एवं भणति उत प्रकृतिस्था। " अस्मात् वाक्यात् 'हर्षिता' इति पदस्य विपरीतार्थकपदं चित्वा लिखत। | कुपिता |
| ग) | विदूषकः (उपसृत्य) 'आज्ञापयतु भवान्' अत्र भवान् इति पदं कस्मै प्रयुक्तम् ? | रामाय |
| घ) | "तस्मादङ्क-व्यवहितम् अध्यास्याताम् सिंहासनम्" – अत्र क्रियापदं किम्? | अध्यास्याताम् |
| ङ) | "वयसस्तु न किञ्चिदन्तरम्" – अत्र आयुषः इत्यर्थे किं पदं प्रयुक्तम् ? | वयसः |

प्र.५ अधोलिखितानि वाक्यानि कः कं प्रति कथयति इति लिखत –

| | | कः | कम् |
|---|---|---|---|
| क) | सव्यवधानं न चरित्रलोपाय। | रामः | लवम् |
| ख) | किं कुपिता एवं भणति, उत प्रकृतिस्था ? | विदूषकः | कुशम् |
| ग) | जानाम्यहं तस्य नामधेयम्। | कुशः | रामम् |
| घ) | तस्या द्वे नाम्नी। | लवः | विदूषकम् |
| ङ) | वयस्य ! अपूर्वं खलु नामधेयम्। | रामः | विदूषकम् |

प्र.६ मञ्जूषातः पर्यायद्वयं चित्वा पदानां समक्षं लिखत –

**शिवः, शिष्टाचारः, शशिः, चन्द्रशेखरः, सुतः इदानीम्,**
**अधुना, पुत्रः, सूर्यः, सदाचारः, निशाकरः, भानुः**

| | | | |
|---|---|---|---|
| क) | **हिमकरः** | शशिः | निशाकरः |
| ख) | **सम्प्रति** | इदानीम् | अधुना |
| ग) | **समुदाचारः** | शिष्टाचारः | सदाचारः |
